# बिहारो विहारे सदा रोचतां वः

विहारे जनिं लब्धवान् याज्ञवल्क्यो
विभक्तुं स भार्याद्वये वित्तमैच्छत् ।
परं मे न काम्यं तदेका ब्रुवाणा-
त्मतत्त्वोपदेशं पतिं स्वं ययाचे ।। 1 ।।

गया तीर्थराजो जरासन्धगेहम्
महावीरजैनो महात्मा स बुद्धः ।
विदेहोऽत्र राजा गजग्राहभूमि-
स्तटे गण्डकीजाह्नवी-पुण्यनीरे ।। 2 ।।

©BSTBPC
NOT TO BE PUBLISHED

पुरा पाटलीपुत्रमेतद् बहूना-
मभूद्राजधानी नृपाणामिदानीम् ।
मुदा राजते राज्यपालो महीयान्
उदीच्यां च गङ्गा पुनातीह लोकान् ।। 3 ।।

इह व्याडिवर्षोपवर्षाः समेताः
परीक्षां प्रदातुं पुरा पाणिनिश्च ।
इमे शब्दशास्त्रे हि विख्यातिमाप्ता
अशोकोऽत्र शुंगो नृपो विक्रमश्च ।। 4 ।।

नद्यस्तु कोशी कमला बलाना
पुन:पुना बागमती च शोण: ।
फल्गु: प्रसिद्धा सरयूर्घघारा
सिञ्चन्ति भूमिं ददते मृदञ्च ।। 5 ।।

राज्यमेतत् प्रसिद्धिं गतं दिक्षु यै
रार्यभट्टस्तथा शङ्क.रो मण्डन: ।
अश्वघोषश्च बाणश्च विद्यापति-
र्जानकी भारती भामती मागधी ।। 6 ।।

शर्मरामावतारश्च बच्चाझिझा
बालकृष्णस्तथा चित्रधारा महान् ।
रामधारी च राजेन्द्र-खाँ विस्मिलौ
तन्वते कीर्तिराशिं विहारस्य न: ।। 7 ।।

©BSTBPC
NOT TO BE PUBLISHED

# लौहस्य-तुला

**पात्राणि** – **धनरामः, मोहनलालः, रामू , न्यायाधीशः, सूत्रधारः ।**

**सूत्रधारः** – धनरामस्य नाम्ना एकः समृद्धः वणिक् आसीत् । कैश्चित् वर्षैः धनरामस्य व्यापारकार्यं सम्यक्तया न चलति स्म । ऋणेन युक्तः स सञ्जातः किन्तु न खलु धनरामः निराशः अपितु चिन्तितवान् यत् अन्यस्मिन् नगरे धनार्जनाय मया गन्तव्यम् । यानि कानि वस्तूनि तेषां पार्श्वे आसन् तानि सर्वाणि वस्तूनि विक्रीय ऋणं समाप्तं कृतवान् । नगरपरित्यागपूर्वं स अचिन्तयत् यत् इमां तुलां स्वसतीर्थ्यस्य मोहनलालस्य सविधे स्यापयामि ।

## प्रथम-दृश्यम्

(मोहनलालस्य गृहम् । धनराममोहनलालौ च सहैव सीदन्तौ स्तः)

**मोहनलालः** – भ्रातः धनराम ! एतादृशीं दुर्दशां तव विलोक्य अतीव दुःखितोऽस्मि । अपि तवाहं कांचित् सहायतां कर्त्तुं शक्नोमि ?

**धनरामः** – भविता भवत्येव । अद्याहं नगरं विहाय अन्यत्र यामि । सर्वाणि वस्तूनि मया विक्रीतानि । मत्पार्श्वे एका लौहतुला एवास्ति । किं इमां तुलां स्थापयितुं त्वं शक्नोषि ?

**मोहनलालः** – कथं न कथं न मित्र । चिन्तां मा कुरु । सुरक्षिता तव तुला मत्पार्श्वे भविष्यति ।

**धनरामः** – धन्यवादः मित्र धन्यवादः । तुला बहिरस्ति । स्वसेवकैः उक्त्वा आभ्यन्तरे स्थापय । आशासे आशुरेव परावर्तिष्यामि। अस्तु, चलामि, नमस्काराः ।

(धनरामः याति)

## द्वितीय-दृश्यम्

(मोहनलालस्य गृहम्)

**सूत्रधारः** – विपुलं वित्तमर्जितवान् धनरामः । केषुचित् वर्षेषु स्वकीयनगरं परावर्त्य मोहनलालस्य गृहं गतवान् ।

**मोहनलालः** – भ्रातः धनराम ! त्वामत्र विलोक्यातीव प्रमुदितोऽस्मि । कीदृशानि कार्याणि चलन्ति ?

**धनरामः** – (स्मयमानः) अहमपि स्वनगरं मित्राणां मध्ये चागत्यातीव हर्षितोऽस्मि । भगवत्कृपया विपुलं धनमर्जितवान् । सम्प्रति अत्रैव कार्यारम्भस्य विचारोऽस्ति । आवश्यकता अस्ति तुलायाः, तां वाञ्छामि ।

**मोहनलालः** – (दुःखितो भूत्वा) किमहं कथयेयम् तव तुलान्तु एकस्मिन् प्रकोष्ठे सुरक्षितरूपेण स्थापितवान् आसम् । पूर्वस्मिन् वर्षे दृष्टवान् यत् तुला तु मूषिकैः भक्षिता ।

**धनरामः** – (साश्चर्यम्) किम् किम् ? किं कथयसि । मूषिकैः भक्षिता तुला !

**मोहनलालः** – आम् मित्र, आम् अतो लज्जितोऽस्मि ।

**धनरामः** – किञ्चित् चिन्तय । चिन्ता न करणीया । मम तुला मूषिकैः खादिता तेन किम् ? न खलु तव दोषः ।

**मोहनलालः** – (प्रसन्नः भूत्वा) त्वमतीव सुष्ठुरसि ।

**धनरामः** – अस्तु, याम्यहम् । आम् । इतः नदी तु सन्निकटा एव । कथन्न नद्यां स्नानं कुर्याम । भ्रातः मोहन ! मया सार्द्धं स्वकीयसुतं प्रेषय, मम वस्त्राणि रक्षिष्यति ।

**मोहनलालः** – आम्, आम् । कथं न मित्र । रामो ! रामो ! आगच्छ, पितृव्येन सह नदीं यावत् गच्छ ।

**रामू** – अस्तु, पिताजीवः ! अस्तु ।

(रामू धनरामश्च गच्छतः)

©BSTBPC NOT TO BE REPUBLISHED

## तृतीय-दृश्यम्

(मोहनलालस्य गृहम्)

**सूत्रधारः** - धनरामः बालकमादाय नदीं प्रति अगच्छत्। मार्गे एकस्य साधोः गुहायां तं त्यक्तवान्। पुनश्च मोहनः स्वगृहमागतवान्।

**धनरामः** - (आकुलस्वरेषु) मोहनलाल ! मोहनलाल !

**मोहनलालः** - (द्वारमुद्घाटयन्) का वार्त्ता, कथमाकुलोऽसि ?

**धनरामः** - (दुःखितो भूत्वा) मोहनलाल ! किमहं कथयेयम् ! तव पुत्रमादाय नदीं प्रति गच्छन् आसम्, सहसा एकः श्येनः आकाशमार्गादागतवान् शीघ्रञ्च पुत्रमुत्थाप्य उड्डीयते स्म ।

(मोहनलालः साश्चर्यं पश्यति धनरामम्)

**मोहनलालः** - कथं मूर्खइव वार्त्तां करोसि । दशवर्षीयं बालकं कथं श्येनः उत्थापयितुं शक्नोति ?

**धनरामः** - विश्वसिहि मित्र, विश्वसिहि !

**मोहनलालः** - असत्यं वदसि, गच्छ, मत्सुतञ्चानय ।

**धनरामः** - (शिरः नमन्) दुःखमस्ति किन्तु नैतादृशं कर्त्तुं शक्नोमि ।

**मोहनलालः** - त्वामहं न्यायालयं घर्षयित्वा नेष्यामि ।

**धनरामः** - अस्तु ! न्यायाधीश एव न्यायं दास्यति अस्य ।

## चतुर्थ-दृश्यम्

(न्यायालये उभे मित्रे आगच्छतः न्यायाधीशस्य समक्षे)

**मोहनलालः** – श्रीमन् ! नरोऽयं मम पुत्रं नीतवान् आसीत् दशवर्षीयम्, सम्प्रति न ददाति पुत्रम् ।

**न्यायाधीशः** – (धनरामम्) किमिदं समीचीनम् ?

**धनरामः** – श्रीमन् ! किमहं कथयेयम् । एकः श्येनः आगत्य पुत्रमुत्थाप्य उत्पतितः । कुतः पुत्रं आनयेयम् श्रीमन् ।

**न्यायाधीशः** – मूर्खेखि वार्त्तां कथं करोषि किं दशवर्षाणि बालकं श्येनः उत्थापयितुं शक्नोति ?

**धनरामः** – कथं न श्रीमन् ! मूषिकः चेत् भारयुक्तां तुलाम् अत्तुं शक्नोति तदा कथं न श्येनः एवं कर्त्तुमर्हति ।

(न्यायाधीशः वीप्सया पश्यति)

NOT TO BE PUBLISHED ©BSTBPC

**न्यायाधीशः** – किं जल्पसि ? पुनः कथय ।

**धनरामः** – श्रीमन् ! भारयुक्तां तुलां मोहनलालस्य पार्श्वे स्थापितवान् आसम् । यदाहं तं याचितवान् तदा तेन भणितं यत् सा तु मूषिकैः भक्षिता । यदि मूषिकाः एवं कर्तुं शक्नुवन्ति तदा कथं न श्येनोऽपि एवं कर्तुमर्हति ।

**न्यायाधीशः** – (मोहनलालम्) धनरामस्य तुलां आशु आनय । तव पुत्रः नूनमेव मिलिष्यति ।

(मोहनलालः जिह्रेति, शिरश्च नमितं करोति)

**मोहनलालः** – क्षम्यताम् श्रीमन् !

**न्यायाधीशः** – युवां गच्छतम् । तुलां पुत्रञ्चानयतम् ।

(किञ्चित् कालानन्तरं उभे आगच्छतः)

**न्यायाधीशः** – (मोहनलालम्) तुलां देहि स्वपुत्रञ्च नय ! (धनरामं प्रति विलोक्य) शोभनं, विवादावसानं सञ्जातम् । भवन्तौ गन्तुं शक्नुतः ।

# पद्यम्

## ज्ञानेन शोभते किल

कर्त्तव्यभावनाया आयाति शुद्धरूपम् ।
सत्कर्मणोऽपि दृष्टं प्रायेण सत्स्वरूपम् ।।
नैतिकबलेन नित्यं संदृश्यते च सत्ता ।
ज्ञानेन शोभते किल लोकस्य व्यक्तिमत्ता ।।

सुखदु:खकष्टमध्ये विचरन्ति जीवलोका:,
क्रियते च सत्प्रयासो न गतास्तथापि शोका: ।
आशायते स पुरुषस्तत्रापि बुद्धिमत्ता,
ज्ञानेन शोभते किल लोकस्य व्यक्तिमत्ता ।।

श्रुत्वा तथैव निहितं मुनिभिस्तथैव विहितम्
पथदर्शकैश्च सततं तथ्यं तथैव कथितम् ।
सद्ज्ञानमेव सत्यं तेनैव सा इयत्ता
ज्ञानेन शोभते बिल लोकस्य व्यक्तिमत्ता ।।

बलमस्ति यत्र तेजस्तत् तेन इष्टसिद्धि: ।
उत्साहभावनाया उपलभ्यते प्रसिद्धि: ।।
तृप्त्या तथापि सहसा तस्या विभाति सत्ता ।
ज्ञानेन शोभते किल लोकस्य व्यक्तिमत्ता ।।

# कुरुक्षेत्रं धर्मक्षेत्रम्

एकदा नृपः कुरुः स्वात्मजैः सह हस्तिनापुरात् कुरुक्षेत्रस्य वने मृगयार्थम् अगच्छत् । मृगयाक्रमे सः नृपः अङ्गरक्षकविहीनोऽभवत् । तस्य शराः समाप्ताः जाताः । दिवसावसानम् आसन्नम् आसीत् । अतः आत्मरक्षार्थं तेन भूमिपतिताः मृदायुक्ताः स्वप्रक्षेपिता द्वित्राः शराः गृहीताः । तस्य अङ्गुलयः मृदायुक्ताः अभवन् । सः स्वनिवासस्थानं परावर्तत । नृपः कुरुःकस्यापि ऋषेः शापवशात् रात्रौ मृतप्रायः भवति स्म। अतः निशायां सः पुनः निष्प्राणः अभवत् । किन्तु तस्य राज्ञी अपश्यत् यत् राज्ञः अङ्गुलयः प्राणयुक्ताः सन्ति । प्रातःकाले विद्वज्जनान् आहूय राजा कुरुः अस्य कारणम् अपृच्छत् । ते अवदन् यत् कुरुक्षेत्रस्य मृदा विशेषशक्तिसम्पन्ना अस्ति । सा मृदा निष्प्राणजनमपि प्राणवन्तं कर्तुमर्हति । इदम् आकर्ण्य तेन नृपेण विचारितं यत् या भूमिः ईदृशी सा नूनमेव बहुसस्यप्रदा अस्ति । तदनन्तरं कुरुः कुरुक्षेत्रस्य अष्टचत्वारिंशत्क्रोशस्य भूमिम् अकर्षत् । अस्मिन कार्ये तेन शिवस्य वृषभः यमस्य महिषः च प्रयुक्तौ । तस्मिन्नेव समये देवेन्द्रः तत्रागत्य कुरुम् अपृच्छत्- हे नृप ! भवान् किं करोति ? नृपोऽवदत्- हे देवेन्द्र ! अहं तपःसत्य-क्षमादया- शौचदानयोग-ब्रह्मचर्याणां कृषिकार्याय भूमिनिर्माणं कुर्वन् अस्मि । इन्द्रः अपृच्छत्-राजन् ! अस्य बीजं कुतः लब्धवान् ? सोऽवदत्-तत् तु मम पार्श्वे अस्ति । कुरोः वचनं श्रुत्वा देवेन्द्रः अहसत् अगच्छत् च ।

यदा कुरुणा सम्पूर्णा भूमिः कृषियोग्या कृता तदा परमेश्वरः विष्णुः तत्रागच्छत् । परमेश्वरः नृपम् अपृच्छत् - हे राजन् ! भवान् किं करोति ? नृपः कुरुः तदेव उत्तरम् अददात् यत् इन्द्रं प्रति दत्तवान् आसीत् । भगवान् विष्णुः अपृच्छत्-राजन् ! बीजं कुत्र आसीत् ? मह्यं देहि, अहं बीजवपनं करिष्यामि । भवान् कर्षणं करोतु । नृपेण स्वदक्षिणबाहुः प्रसारितः । विष्णुना तस्य बाहोः सहस्रखण्डानि कृतानि । तदा नृपः विष्णुं स्वशरीरम् आपर्यत् । प्रसन्नो भूत्वा विष्णुः अवदत् - राजन् ! वरं वृणुहि । नृपः अवदत् - ''भगवन् ! मया यावती भूमिः कर्षिता, सर्वा पुण्यक्षेत्रं 'धर्मक्षेत्रं' भूत्वा मम नाम्ना विख्याता भवेत् । भवान् भगवता शिवेन तथा सर्वैः देवैः सह अत्र निवासं करोतु। योऽपि अत्र मृत्युं प्राप्स्यति सः स्वर्गाधिकारी भवेत् ।'' 'तथास्तु' इत्युक्त्वा भगवान् विष्णुः अन्तर्हितः अभवत् । तस्मात् कालात् कुरुक्षेत्रस्य भूमिः 'धर्मक्षेत्रम्' इति नाम्ना विख्याता अभवत् । श्रीकृष्णोऽपि श्रीमद्भगवद्गीतायां कुरुक्षेत्रं धर्मक्षेत्रम् उक्त्वा अस्य क्षेत्रस्य महत्वं प्रतिपादितवान् ।

©BSTBPC NOT TO BE REPUBLISHED

# प्रहेलिकाः

(1)

अपदो दूरगामी च, साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च, वो जानाति स पण्डितः ।।

(2)

न तस्यादिः, न तस्यान्तः मध्ये यः तस्य तिष्ठसि ।
तवाप्यस्ति ममाप्यस्ति, यदि जानासि तद् वद ।।

(3)

तातेन कथितं पुत्र, लेखमेकं लिखाधुना ।
न तेन लिखिता लेखः, पितुराज्ञा न लंघिता ।।

(4)

कृष्णानना न मार्जारी, द्विजिह्वा न च सर्पिणी ।
पञ्चभर्त्री न पाञ्चाली, यो जानाति स पण्डितः ।।

(5)

वृक्षाग्रवासी न च पक्षिराजः,
त्रिनेत्रधारी न च शूलपाणिः ।।
त्वग्वस्त्र-धारी न च सिद्धयोगी,
जलं च बिभ्रन्न घटो न मेघः ।।

(6)

वृक्षाग्रवासी न च पक्षिराजस्तृणं च शय्या न च राजयोगी ।
सुवर्णकायो न च हेमधातुः पुंसश्च नाम्ना न च राजपुत्रः ।।

©BSTBPC
NOT TO BE PUBLISHED

(7)

नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता ।
अमुखी कुरुते शब्दं जातमात्रा विनश्यति ।।

(8)

वने वसति को वीरो योऽस्थिमांसविवर्जित: ।
असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गत: ।।

(9)

चक्री त्रिशूली न हरिर्न शम्भु:
महान् बलिष्ठो न च भीमसेन: ।
स्वच्छन्दचारी नृपतिर्न योगी
सीतावियोगी न च रामचन्द्र: ।

(10)

केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागत: ।
रुदन्ति कौरवास्तत्र हा हा केशव केशव ।।

(11)

रेफ आदौ मकारोऽन्ते वाल्मीकिर्यस्य गायक: ।
सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रिय: ।।

(12)

एको ना विंशति: स्त्रीणां स्नातुं हि यमुनां गता: ।
विंशति: पुनरायाता एको नक्रेण भक्षित: ।।

(13)

शस्त्रं नखलु नेष्यामि- इत्थमुक्त्वा रणे गत: ।
तदेव शस्त्रं कृतवान् स्वप्राणं च ररक्ष स: ।।

(14)
स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् ।
ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम् ॥

(15)
त्रिनेत्रोऽपि शिवो नास्मि घटो नास्मि जलान्वितः ।
कूर्चश्मश्रुयुतो नित्यं नरो नास्मि ब्रवीतु माम् ॥

(16)
दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ॥

(17)
यानस्याङ्गं हरेः शस्त्रंः चिह्नं भारतभूपतेः ।
चलन्तं वर्तुलाकारं यो जानाति स पण्डितः ॥

(18)
मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः ।
बलिष्ठोऽस्मि च भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः ॥

(19)
नृत्यामि नित्यं धवलास्तरेषु,
संकेतिताङ्कैः प्रकटीकरोमि ।
भावं जनानां हृदयेषु गूढं
कृष्णाननाऽऽलोच्य वदन्तु काऽहम् ॥

(20)
का पाण्डुपत्नी गृहभूषणं के,
को रामशत्रुः किमगस्त्यजन्म ।
सूर्यैक-पुत्रो वद वेत्सि चेत्त्वं
कुन्ती-सुता रावणकुम्भकर्णाः ॥

## ग्रन्थकाराः

(क)

| रचना | – | रचनाकारः |
|---|---|---|
| रामायणम् | – | महर्षिः वाल्मीकिः |
| महाभारतम् | – | महर्षिः वेदव्यासः |
| रघुवंशम् | – | कालिदासः |
| कुमारसम्भवम् | – | कालिदासः |
| मालविकाग्निमित्रम् | – | कालिदासः |
| विक्रमोर्वशीयम् | – | कालिदासः |
| अभिज्ञानशकुन्तलम् | – | कालिदासः |
| ऋतुसंहारम् | – | कालिदासः |
| मेघदूतम् | – | कालिदासः |
| सौन्दरनन्दम् | – | अश्वघोषः |
| बुद्धचरितम् | – | अश्वघोषः |
| किरातार्जुनीयम् | – | भारविः |
| शिशुपालवधम् | – | माघः |
| राजतरङ्गिणी | – | कल्हणः |
| दशकुमारचरितम् | – | दण्डी |
| वासवदत्ता | – | सुबन्धुः |
| हर्षचरितम् | – | बाणभट्टः |
| कादम्बरी | – | बाणभट्टः |
| स्वप्नवासवदत्तम् | – | भासः |
| चारुदत्तम् | – | भासः |
| प्रतिमानाटकम् | – | भासः |
| मृच्छकटिकम् | – | शूद्रकः |

| | | |
|---|---|---|
| **मुद्राराक्षसम्** | – | विशाखदत्तः |
| **कथासरित्सागरः** | – | सोमदेवः |
| **बृहत्कथामञ्जरी** | – | क्षेमेन्द्रः |

(ख) **लोकोक्तयः**

| | | |
|---|---|---|
| **कीर्तिर्यस्य स जीवति** | – | यशस्वी अमर होता है । |
| **अल्पविद्या भयंकरी** | – | कम पढ़ा कष्टदायक होता है । |
| **अतिपरिचयात् अवज्ञा** | – | अत्यन्त मेल-जोल से तिरस्कार होता है । |
| **कोऽतिभारः समर्थानाम्** | – | सामर्थ्यवान् पुरुष के लिए कुछ भी असाध्य नहीं। |
| **न निम्बो मधुरायते** | – | स्वभाव नहीं बदलता । |
| **महाजनो येन गतः स पन्थाः** | – | बड़ों की राह भली । |
| **सत्यमेव जयते नानृतम्** | – | सत्य की जीत होती है, झूठ की नहीं । |
| **विषकुम्भं पयोमुखम्** | – | मुँह में राम बगल में छुरी । |
| **गतस्य शोचनं नास्ति** | – | बीती ताहि बिसारि दे । |

(ग) **क्रिया-संक्षेपः**

| | | |
|---|---|---|
| **अत्तुमिच्छति** | – | जिघत्सति |
| **कर्त्तुमिच्छति** | – | चिकीर्षति |
| **प्रष्टुमिच्छति** | – | पिपृच्छिषति |
| **स्थातुमिच्छति** | – | तिष्ठासति |
| **हन्तुमिच्छति** | – | जिघांसते |
| **पातुमिच्छति** | – | पिपासति |
| **दातुमिच्छति** | – | दित्सति |
| **पठितुमिच्छति** | – | पिपठिषति |
| **कुर्वन्तं प्रेरयति** | – | कारयति |

| | | |
|---|---|---|
| **पिबन्तं प्रेरयति** | – | पाययति |
| **गच्छन्तं प्रेरयति** | – | गमयति |
| **शयानं प्रेरयति** | – | शाययति |
| **विद्वान् इवाचरति** | – | विद्वायते |
| **कुमारी इवाचरति** | – | कुमारायते |
| **युवतिः इवाचरति** | – | युवायते |

h h h